"ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति" ॥

राजयक्ष्मान्तर्गतरोगविशेषे, पुं ।
"क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटीग्रहः" ॥

अस्य चिकित्सा यथा,—
"क्षामः क्षीणः क्षतोरस्कस्त्वनिद्रः सबलेऽनले ।
शृतक्षीररसेनाद्यात् सक्षौद्रघृतशर्करम् ॥
शर्कराञ्च यवक्षौद्रजीवकर्षभकौ मधु ।
शृतक्षीरानुपानं वा लिह्यात् क्षीणः क्षतः कृशः ॥
क्रव्यादमांसनिर्य्यूहं घृतभृष्टं पिबेच्च सः" ॥
"क्षामक्षीणकृशाङ्गानां एतान्येव घृतानि च ।
त्वक्क्षीरीशर्करालाजचूर्णैः पानानि योजयेत् ।
सर्पिर्गुडान् समध्वंशान् जग्ध्वा दद्यात्पयोऽनु च ॥
रेतो वीर्य्यं बलं पुष्टिं तैराशुतरमाप्नुयात्" ॥
"पलाशं सर्पिषा भृष्टं विदारीक्षुरसे शृतम् ।
स्त्रीषु क्षीणः पिबेद्यूषं जीवनं बृंहणं परम् ॥
जीवनीयोपसिद्धं वा घृतभृष्टन्तु जाङ्गलम् ।
रसं प्रयोजयेत् क्षीणो व्यञ्जनार्थं सशर्करम्" ॥
"यद्यत् सन्तर्पणं शीतमविदाहि हितं लघु ।
अन्नपानं निषेव्यन्तत् क्षतक्षीणैः सुखार्थिभिः" ॥
इति चिकित्सास्थाने षोड़शेऽध्याये चरकेणोक्तम् ॥)

क्षीणवान्, [त्] त्रि, (क्षि + क्तवतु "क्षियोदीर्घात् । ८ । २ । ४६ । इति निष्ठातस्य नः ।) क्षयविशिष्टः । इति व्याकरणम् ॥

क्षीणाष्टकर्म्मा, [न्) पुं, (क्षीणानि अष्टकर्म्माणि अस्य ।) जिनः । इति हेमचन्द्रः ॥

क्षीव, (व) ऋ ङ मदे । इति कविकल्पद्रुमः । (भ्वां-आत्मं-अकं-सेट् ।) मदे मत्तीभावे । ऋ, अचिक्षीवत् । ङ, क्षीवते मद्यपः ! इति दुर्गादासः ॥

क्षीवः, त्रि, (क्षिव + "अनुपसर्गात् फुल्लक्षीवकृशोल्लाघाः" । ८ । २ । ५५ । इति तलोपे साधुः ।) मत्तः । इत्यमरः । (यथा, रामायणे । ५ । १० । १२ ।
"अथारोहणमासाद्य वेदिकान्तरमाश्रितः ।
क्षीवं राक्षसशार्दूलं प्रेक्षते स्म महाकपिः" ॥)

क्षीरं, क्ली, (घस्यते अद्यते इति । "घसे किच्च" । उणां ४ । ३४ । इति ईरन् उपधालोपे कत्वं षत्वञ्च ।) जलम् । यथा, ऋग्वेदे । १ । १०४ । ३ ।
"अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन् । क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः" । दुग्धम् । इत्यमरः । २ । ९ । ५१ ॥ (यथा, मनुः । ५ । ९ ।
"स्त्रीक्षीरञ्चैव वर्ज्यानि सर्व्वशुक्तानि चैव हि" ।)
"आसप्तरात्रं प्रसवात् क्षीरं पेयूषमुच्यते ।
परतो मोरटं विद्यादप्रसन्नं कफात्मकम्" ॥
इति रत्नमाला ॥
(क्षीरस्य लक्षणं गुणाश्च यथा,—
"अथातः संप्रवक्ष्यामि क्षीरवर्गन्तु वत्सक ! ।
दधिसर्पिर्वसातक्रं तेषां सर्व्वगुणागुणम् ॥
यद्यदाहारजातन्तु रसं क्षीरशिरागुणम् ।
सरं जलञ्च भुक्तञ्च तथा पित्तेन संयुतम् ॥
पाचितं जाठरे वह्नौ पित्तेन सह मूर्च्छितम् ।
पच्यमानं शिराप्राप्तं क्षीरं तद्विद्धि पुत्रक ! ॥
तेन क्षीरमिति ख्यातमग्निसोमात्मकं पयः ।
अमृतं सर्व्वभूतानां जीवनं बलकृन्मतम् ॥
हारीतः संशयापन्नः पप्रच्छ पितरं पुनः ।
कथं रसस्य सम्पत्तिः कथं सङ्क्षीयते विभो ! ॥
कथं रक्तस्य संस्थाने क्षीरं पाण्डुलमीयते ।
कथं तत्र कुमारीणां बन्ध्यानां न कथं भवेत् ॥
एवं पृष्टो महाचार्य्यः प्रोवाच मुनिपुङ्गवः ।
अतिहर्षप्रदं पुत्र ! परिपृष्टं भिषग्वर ! ॥
सिताम्लिग्धं तथारक्तं पित्तेन पाकतां गतम् ।
रक्तं श्वेतत्वमायाति तथा क्षीरं सितं भवेत् ॥
अपधातुबलं यस्मात् तस्मात् क्षीरं न जायते ।
बन्ध्यानां क्षीरनाड्यस्तु वातेन परिपूरिताः ॥
क्षीरञ्च न भवेत्तस्मात्तत्त्वं चाधिकं यतः ।
प्रसूतासु च नारीषु बलेन सह सूयते ॥
तेन स्रोतोविशुद्धिः स्यात् क्षीरमाशु प्रवर्त्तते ।
तस्मात् सद्यः प्रसूतायां जायते श्लैष्मिकं पयः ॥
तेन काठिन्यमायाति तस्मात्तत् परिवर्जयेत् ।
श्रेयस्याविकृतं नार्य्या बलकृद्दोषनाशनम् ॥
पयस्त्रिदोषशमनं वृष्यञ्चाग्निप्रवर्द्धनम्" ॥

अथ प्राभातिकक्षीरगुणाः ।
"निशा शीतांशुसंशीतं निद्रालस्याश्रमावहम् ।
कफकृत्स्वघनं शीतं क्षीरं प्राभातिकं भवेत्" ॥

अथ दिनक्षीरगुणाः ।
"वासरे सूर्य्यसन्तापात् सदोष्णं कफवातजित् ।
हितं तत्पित्तशमनं सुशीतं भोजने निशि" ॥

अथ क्षीरपानविधिः ।
"क्षीणानां दुर्ब्बलानाञ्च तथाजीर्णज्वरार्द्दिते ।
दीप्ताग्नीनामतन्द्राणां श्रमशोषविकारिणाम् ॥
राजयक्ष्मयुतानाञ्च क्षीरपानं विधीयते ॥
न शस्तं लवणैर्युक्तं क्षीरमाम्लेन वा पुनः ।
करोति कुष्ठं त्वग्दोषं तस्मान्नैव हितं मतम्" ॥
इति प्रथमे स्थाने ऽष्टमे ऽध्याये हारीतेनोक्तम् ॥
"अथ क्षीराणि वक्ष्यन्ते कर्म्म चैषां गुणाश्च ये ॥
अविक्षीरमजाक्षीरं गोक्षीरं माहिषञ्च यत् ।
उष्ट्रीणामथ नागीनां वड़वायाः स्त्रियास्तथा ॥
प्रायशो मधुरं स्निग्धं शीतं स्तन्यं पयो मतम् ।
प्रीणनं बृंहणं वृष्यं मेध्यं बल्यं मनस्करम् ॥
जीवनीयं श्रमहरं श्वासकासनिवर्हणम् ।
हन्ति शोणितपित्तञ्च सन्धानं विहतस्य च ॥
सर्व्वप्राणभृतां सात्म्यं शमनं शोधनन्तथा ।
तृष्णाघ्नं दीपनीयञ्च श्रेष्ठं क्षीणक्षतेषु च ॥
पाण्डुरोगेऽम्लपित्ते च शोषे गुल्मे तथोदरे ।
अतीसारे ज्वरे दाहे श्वयथौ च विधीयते ॥
योनिशुक्रप्रदोषे च मूत्रेषु प्रदरेषु च ।
पुरीषे ग्रथिते पथ्यं वातपित्तविकारिणाम् ॥
नस्यालेपावगाहेषु वमनास्थापनेषु च ।
विरेचने स्नेहने च पयः सर्व्वत्र युज्यते" ॥
इति चरके सूत्रस्थाने प्रथमेऽध्याये ॥
प्राणिभेदेनास्य गुणविशेषा यथा,—
"स्वादु शीतं मृदु स्निग्धं बहलं श्लक्ष्णपिच्छिलम् ।
गुरु मन्दं प्रसन्नञ्च गव्यं दशगुणं पयः ॥
तदेव गुणमेवौजः सामान्यादभिवर्द्धयेत् ।
प्रवरं जीवनीयानां क्षीरमुक्तं रसायनम् ॥
माहिषीणां गुरुतरं गव्याच्छीततरं पयः ।
स्नेहान्यूनमनिद्राय हितमत्यग्नये च तत् ॥
रूक्षोष्णं क्षीरमुष्ट्रीणामीषत्सलवणं लघु ।
शस्तं वातकफानाहक्रिमिशोफोदरार्शसाम् ॥
बल्यं स्थैर्य्यकरं सर्व्वमुष्णञ्चैकशफं पयः ।
साम्लं सलवणं रूक्षं शाखावातहरं लघु ॥
छागं कषायमधुरं शीतं ग्राहि पयो लघु ।
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् ॥
हिक्काश्वासकरन्तूष्णं पित्तश्लेष्मलमाविकम् ।
हस्तिनीनां पयो बल्यं गुरु स्थैर्य्यकरं परम् ॥
जीवनं बृंहणं सात्म्यं स्नेहनं मानुषं पयः ।
नावनं रक्तपित्ते च तर्पणञ्चाक्षिशूलिनाम्" ॥
इति च तत्र सूत्रस्थाने २७ अध्याये ॥
"सर्व्वप्राणभृतां तस्मात् सात्म्यं क्षीरमिहोच्यते" ॥
तत्र सर्व्वमेव क्षीरं प्राणिनामप्रतिषिद्धं जातिसात्म्यात् । वातपित्तशोणितमानसविकारेष्वविरुद्धम् । जीर्णज्वर-कास-श्वास-शोष-क्षय-गुल्मोन्मादोदर-मूर्च्छा-भ्रम-मद-दाह-पिपासा-हृद्वस्तिपाण्डुरोग-ग्रहणीदोषार्शःशूलोदावर्त्तातिसारप्रवाहिकायोनिरोग-गर्भास्राव-रक्तपित्तश्रमक्लमहरं पाप्मापहम् बल्यं वृष्यं वाजीकरणं रसायनं मेध्यं सन्धानं स्थापनं वयःस्थापनमायुष्यं जीवनं बृंहणं वमनं विरेचनञ्च तुल्यगुणत्वाच्चौजसो वर्द्धनमिति बालवृद्धक्षतक्षीणानां क्षुद्व्यवायव्यायामकर्शितानाञ्च पथ्यतमम् ।
"गोक्षीरमनभिष्यन्दि स्निग्धं गुरु रसायनम् ।
रक्तपित्तहरं शीतं मधुरं रसपाकयोः ॥
जीवनीयं यथावातपित्तघ्नं परमं स्मृतम् ।
गव्यतुल्यगुणन्त्वाजं विशेषाच्छोषिणां हितम् ॥
दीपनं लघु संग्राहि श्वासकासास्रपित्तनुत् ।
अजानामल्पकायत्वात् कटुतिक्तनिषेवणात् ॥
नात्यम्बुपानाद्व्यायामात् सर्व्वव्याधिहरं पयः ।
रूक्षोष्णं लवणं किञ्चिदौष्ट्रं स्वादुरसं लघु ॥
शोफगुल्मोदरार्शोघ्नं क्रिमिकुष्ठविषापहम् ।
आविकं मधुरं स्निग्धं गुरु पित्तकफावहम् ॥
पथ्यं केवलवातेषु कासे चानिलसम्भवे ।
महाभिष्यन्दि मधुरं माहिषं वह्निनाशनम् ॥
निद्राकरं शीतकरं गव्यात्स्निग्धतरं गुरु ।
उष्णञ्चैकशफं बल्यं शाखावातहरं पयः ॥
मधुराम्लरसं रूक्षं लवणानुरसं लघु ।
नार्य्यास्तु मधुरं स्तन्यं कषायानुरसं हिमम् ॥
नस्याश्चोतनयोः पथ्यं जीवनं लघु दीपनम् ।
हस्तिन्या मधुरं वृष्यं कषायानुरसं गुरु ॥
स्निग्धं स्थैर्य्यकरं शीतं चक्षुष्यं बलवर्द्धनम् ।
प्रायः प्राभातिकं क्षीरं गुरु विष्टम्भि शीतलम् ॥
रात्रौ सोमगुणत्वाच्च व्यायामाभावतस्तथा ।
दिवाकराभितप्तानां व्यायामानिलसेवनात् ॥
वातानुलोमिश्रान्तिघ्नं चक्षुष्यञ्चापराह्निकम् ।
पयोऽभिष्यन्दिगुर्व्वामं प्रायशः परिकीर्त्तितम् ॥
तदेवोक्तं लघुतरमनभिष्यन्दि वै शृतम् ।